Shri Raghunatha Temple MSS. Library,
JAMMU

No. ४५०४

Title मन्त्ररत्न मञ्जूषा

Author ✗

Extent ११ Age ✗

Subject तन्त्र म्

𑆩𑆁𑆠𑇀𑆫𑆫𑆘𑆩𑆁𑆘𑆷𑆰𑆳

नं॰ ४०५॰४

मंत्रस्त्रमंत्रणा प॰ ११

पत्र २१

नंत्र १६५

मं
॥१॥

श्रीगणेशायनमः ॥ श्रीढुंढिराजायनमः ॥ प्रणम्यपार्वतीनाथं प्रणाम्य पुरुषो
त्तमं ॥ क्रियते मंत्ररत्नानां मंजूषा विशदाभुना ॥ १ ॥ पटलैरष्टभिः पूर्णा सप्र
योगैः समंत्रकैः ॥ तत्रादौ गुरुशिष्याणां लक्षणं च विचिन्तानं ॥ २ ॥ शान्तो दां
तः कुलीनश्च विनीतः शुद्धवेषवान् ॥ शुद्धाचारः सुप्रसिद्धः शुचिर्दक्षः सुबुद्धि
मान् ॥ आश्रमी ध्याननिष्ठश्च मंत्रतंत्रविचक्षणः ॥ निग्रहानुग्रहे शक्तो गु
रुरित्यभिधीयते ॥ अथ शिष्यलक्षणं ॥ शांतो विनीतः शुद्धात्मा श्रद्धावान्
धारणाक्षमः ॥ समर्थश्च कुलीनश्च प्राज्ञः सच्चरितो यतः ॥ एवमादिगुणो
पेतः शिष्यो भवति नान्यथा ॥ गुरुतो शिष्यता वापि तयोर्वत्सरवासतः ॥ रा.म.०

॥१॥

तत्र दीक्षां विना मंत्रग्रहणमेव न संभवति। अदीक्षितस्य प्रचरन्न पापक्षयाभावा
त्॥ प्रक्षीणपापस्यैव मंत्रेऽधिकारात्॥ दिव्यभावं ददाति पापं क्षिणोति चेति दीक्षा
स्वरूपत्वाच्च॥ सम्यग्गुरोर्दीक्षां प्राप्य मंत्रग्रहणं कर्त्तव्यं॥ तत्रापि सिद्धसाध्यादि
भेदैश्च स्वकुलान्यकुलादिभिश्च ऋणधनादिभिश्च संशोध्यैवानुरूपा दीक्षा
दातव्या॥ शोधनप्रकारं संक्षेपतो व्याहरिष्यामः॥ सिद्धसाध्यादिभेदेन स्वकु
लान्यकुलेन च॥ बालप्रौढजराभेदैस्तथा स्त्रीपुंनपुंसकैः॥ राशिनक्षत्रभेदेन
सुप्तबुद्धादिभिस्तथा॥ ऋणेन च धनेनापि भागशास्त्रोपलक्षितैः॥ तथा
हि प्राक्पश्चिमाग्ररेखापंचकं तथैव दक्षिणोत्तररेखापंचकं कार्यं॥ तत्र प्रथ

मं०

॥२॥

2

मत्तीयएकादशनवकोष्ठेषु यथाक्रमं अकारादिस्वरचतुष्टयं विलिख्य द्विती
यचतुर्थद्वादशदशकोष्ठेषूत्तरस्वरचतुष्टयं विलिख्य। तथैव षष्ठाष्टमयोः षोड
शचतुर्दशकोष्ठेषूत्तरस्वरचतुष्टयं विलिख्य। पंचमसप्तमपंचदशत्रयोदशको
ष्ठकेषु अवशिष्टान्स्वरान्विलिख्य। कादीन्वर्णान्तेनैव क्रमेण विलिखेत्।
कोष्ठेषु आद्यस्वरेषु यो वर्णस्तत्तत्पंचममालिखेत्। तत्र द्वित्रिचतुष्केषु त
त्तत्पंचमनमालिखेत्। यस्मिन्कोष्ठे साधकस्य निजनामाद्यक्षरं भवेत्तद्देव
सिद्धं जानीयात्। कुलाकुलगणानाक्रमात्। मंत्राद्यक्षरपर्यंतं कृत्वा गणनीयं रा०म०
सर्वकोष्ठेषु प्राग्दक्षिणादिना॥ तत्र सिद्धः सुसिद्धः स्वीकार्यः॥ साध्यसुसाध्य ॥२॥

मः॥ अरिस्त्याज्यः॥ तत्र सिद्धार्णो बांधवाप्रोक्ता साध्यस्तो सेवकामताः। सुसिद्धपोष
काज्ञेयाः। शत्रुर्वोघातकाप्रोक्तास्त्याज्याः एवं हि सर्वदा॥ सिद्धः सिध्यति कालेन सा
ध्यस्तु जपहोमतः। सुसिद्धो ग्रहणादेव रिपुर्मूलनिकृन्तनः॥ सिद्धः सिद्धो यथो
क्तेन द्विगुणात्सिद्धसाधकः। सिद्धः सुसिद्धोऽर्द्धजपात्सिद्धारिर्हंति बांधवान्॥
साध्यसिद्धो द्विगुणितात् ततः साध्यसाध्यो निरर्थकः। साध्यसुसिद्धस्त्रिगुणात्ते:
साध्यारिर्हंति गोत्रजान्॥ सुसिद्धसिद्धोऽर्द्धजपात्तत्साध्यो द्विगुणाधिकात्॥ त
त्सुसिद्धो ग्रहणात्तस्तदरिर्ज्ञातिजातिहा॥ अरिसिद्धः सुतं हंत्यादरिसाध्यस्तु
कन्यकां। तत्सुसिद्धस्तु पत्नीघ्नस्तदरिर्हंति साधकं॥ आद्यव्येकादशांके द्विच

तुर्दशपङ्क्तिषु। षष्ठाष्टाशि मनौ पंचे सप्त पंचदशा मन्मथे। नृसिंहार्कवराहाणां प्रा
सादप्रणवस्य च॥ सपिंडाक्षरमंत्राणां सिद्धादिर्न्नैव शोधयेत्॥ स्वप्नलब्धे स्त्रिया
दत्ते मालामंत्रे च त्र्यक्षरे॥ वैदिकेषु च सर्वेषु सिद्धादिर्न्नैव शोधयेत्॥ सिद्धसिद्धो
ग्राह्यो साध्यं शत्रुं च वर्जयेन्मतिमान्। अज्ञानवतो रिपुर्यस्य मनवे त्याज्यः स मंत्र
कः॥ स्यान्नत्रयागतो रिपी मंत्रो मन्त्रसमो मतः॥ शत्रुर्न्नवति यद्यादौ मध्ये सि
द्धस्तदंतके साध्यः। क्लेशेन कार्यसिद्धिस्तस्य फलं स्वल्पमेव भवेत्। अंते यदि
भवति रिपुः प्रथमे मध्ये च साध्यपुगततनं। कार्यं वित्तं वित्तं स्यात्पुरा स्यापि
सर्वमेवांते॥ सिद्धं स्तु सिद्धं मथवा रिपूणां तरितं परीक्षयेद्यत्नात्॥ दुःस्वपा

संप्रज्वलितं मंत्रं वर्जयेन्मतिमान् ॥७॥ अथ स्वकुलान्यकुलभेदः कथ्यते ॥ उऊ
ऋॠगजदंडवलता: पार्थिवा: ॥ अआइईओघकठधमवसा: वारुणा: ॥ इईऐखछ
ठचफरक्षा: आग्नेया: ॥ अंअःएकवरतपयषा: मारुता: ॥ लृलॄअंउ· ञशानाभ
सा: ॥ साधकस्याक्षरं पूर्वं मंत्रस्यापि तदक्षरं ॥ एतद्योक्रमतो दैवतं जानीयात्
स्वकुलं हि तत् । तथैव नक्षत्रगणान मपि स्वकुलं ॥ एतदन्यकुलं ॥ पार्थिववारु दन्यप
णां मित्रं ॥ आग्नेयस्यापि मारुतं मित्रं । पार्थिवस्यापि विक्षराराणां चशत्रुत्वे मारुतं
स्थितं । आग्नेयस्यांन संशत्रुरं नससत्वेज संतथा ॥ एतेषामपि सर्वेषां मवि
रोधितुनानसं ॥ परस्परविरुद्धानां न कुर्यान्मेलनं बुधः ॥ अथ मंत्राणां वा

मं०
॥४॥

लादिभेदः कथ्यते। एकादशादिमारभ्य षोडशाक्षरपर्यन्ता बाला॥ ततऊर्द्धविं-
शतिर्यावत्प्रौढाः॥ ततोन्येस्य विरा ज्ञेयाः। येस्वाहांतास्ते स्त्रीरूपा ज्ञेयाः॥
येहुंफडंतास्ते पुमांसः। नमोंतास्ते नपुंसकाः॥ अथराशिभेदस्तनं कथ्यते॥ अ-
आइई मेषः १ उऊऋ वृषः २ ॠऌॡ मिथुनः ३ एऐ कर्कटः ४ ओऔ सिंहः ५
अंअः शषसहलक्षाः कन्या ६ कवर्गस्तुला ७ चवर्गो वृश्चिकः ८ टवर्गो धनुः ९
तवर्गो मकरः १० पवर्गः कुंभः ११ यरलव मीनः १२ साधकनामाद्यक्षरराशिमा-
रभ्य गणयेत्। एकपंचनववोधवास्सुता द्वौ च षट् दशमास्तु सेवकाः॥
त्रीणि सप्त रुद्रगणास्तु पोषकाः द्वादशाष्टचस्तु घातकाः॥ अथनक्षत्र

रा०म०
॥४॥

5

प्रकारः॥ अ आ अश्विनी देवगणः १ इ भरणी मनुष्यगणः २ ई उ ऊ कृत्तिका राक्ष
सगणः ३ ऋ ॠ लृ ॡ रोहिणी मनुष्यगणः ४ ए मृगो देवगणः ५ ऐ आर्द्रा मनु
ष्यगणः ६ ओ औ पुनर्वसुर्देवगणः ७ कः पुष्यः देवगणः ८ ख ग अश्लेषा राक्ष
सगणः ९ घ ङ मघा राक्षसगणः १० च पूर्वा मनुष्यगणः ११ छ ज उत्तरा मनुष्य
गणः १२ झ ञ हस्तो देवगणः १३ ट ठ चित्रा राक्षसगणः १४ ड स्वाती देवगणः १५
ढ णा विशाखा राक्षसगणः १६ त थ द अनुराधा देवगणः १७ ध ज्येष्ठा राक्षस
गणः १८ न प फ मूलं राक्षसगणः १९ ब पूर्वाषाढ मनुष्यगणः २० भ उत्तरा
षाढ मनुष्यगणः २१ म श्रवणो देवगणः २२ य र धनिष्ठा राक्षसगणः २३

मं॰
॥५॥

त्वशातततारकाशाद्वसगणाः २४ वशाष्टवीभाद्रपदममनुष्यगणाः २५ उ॰ भ॰ ष्ठाः रेव
तीदेवगणाः २७ साधकनामाक्षराः त्वादिद्विरूपेन गणायेत्॥ जन्मसंपद्विप
त्क्षेमप्रत्यरिः साधको वधः॥ मैत्रं परममैत्रं च जन्मादीनि पुनः पुनः॥ विपत्प्र
त्यरिवधः परित्याज्यः॥ अथ मंत्राणां सुप्तप्रबोधकालो विधीयते। तत्र सर्वे
मंत्रास्त्रिधा भवंति। प्रकृतिपुरुषात्मकरूपा उभयस्य नावाच्या॥ मातृका
यास्यादेकरूपत्वात्। तत्रापि स्वराः षोडश सौम्याः॥ स्पर्शाः सौराः। परत्व
शषसहाः व्यापकाश्चाग्नेयाः। स्वरा अपि ह्रस्वदीर्घनपुंसकभेदास्त्रिधा॥
अइउऋऌ ओ ऐ ए ते षट् ह्रस्वाः। आईऊऋॄ ऐ औ अः षट् दीर्घाः। ऋ ॠ ऌ ॡ नपुं रा॰म॰
॥५॥

सकाः॥प्रबोधप्रकारस्त्वयं।यदादक्षिणभागेवायुर्वहतितत्तदादक्षिणाय
नेतदानीमेवह्रस्वाः॥प्रबुध्यमवंति।तदाद्याश्चतत्त्वचुराख्यमंत्राःप्रबुध्यम
वंति।एवमस्यएवद्वंतरेखांस्वापकालेः।यदात्तूत्तरभागेवायुर्वहतितदोत्तरा
यणंतदानीमेवदीर्घाःप्रबुध्यंति।तत्प्रधानाश्चतदाद्याश्चतत्त्वचुराख्यमं
त्राःप्रबुध्यंते।यदाचोत्तभागाद्दक्षभागप्रवेशसमयेकियंतमपिकालंवा
योःस्थिरीभावस्तदाविषुवत्कालस्तदानीमेवग्मल्हीतिवर्णौप्रबुध्येते।त
दातत्त्वचुराख्यमंत्राःप्रबुध्यंते।तथादक्षभागादुत्तरभागप्रवेशसमयेउ
भयत्रवायोःस्थिरीभावस्तदाक्ष्मल्हितिवर्णौप्रबुध्येते।तत्प्रधानाश्च

मंत्राइति॥अथवाप्राणापानसमरसीकरणेनमूलाधाराडुच्चसंतींचिद्युत्त
ड्डितविवर्त्तान्महिस्यशेषचक्राक्रमणं॥निरवधिमहानंदप्रसरात्तिकाकुल
शक्तिसमुत्थाप्यशिवशक्तिसामरस्यमास्थितस्यकस्यापियाद्वितीयाप
रिमितानत्वमत्कारदृशासापिसर्वमंत्राणांप्रबोधकालः॥एतदन्याप्रबो
धकालः॥जपश्चसर्वमंत्राणांप्रबोधकालएव॥मंत्रोपदेशाश्च॥मातृका
क्षराणिललकारपर्यंतंसानुस्वाराणिसाध्यमंत्रेणप्रत्येकंसंपुटीकृत्यक्ष
कारंकेवलमुच्चार्यपुनर्ललकारादीनिसविसर्गाणितथैवसंपुटीकृत्य
जपेक्रियमाणेमंत्रःशीघ्रंसफलोभवति॥अथमंत्रसाधनशोधनंक

ध्यते॥ इंद्रदंतीनेत्ररविपंचदशर्तुवेदवह्न्यायुधाष्टनवभिर्गुणितान्साध्यान्॥
दिग्भूगिरिश्रुतिगजाग्निमुनीषुवेदषड्वह्निभिश्च गुणितानथ साधकानां।
नामाक्षरत्वादकवर्गाद्यजनक्रमेव ज्ञात्वा तयोरधिककरो बहुपुत्रकारो स्यात्॥ अस्यां
पमर्थः॥ साध्यानाम्नाक्षरराशिस्वरव्यंजनरूपेणापृथक्कृत्वा प्रत्यक्षरमिंद्रादि
भिरंकैर्यथासंख्येन गुणयेत्॥ कथं इंद्र१४ दंत३२ नेत्र२ रवि१२ पंचदश१५
ऋतु६ वेद४ वह्नि३ आयुध८ अष्ट८ नवभि९ एतैरिति यावत्। तथा साधक
नाम्नाक्षरराशिस्वरव्यंजनरूपेणापृथक्कृत्वा दिग्भिरंकैर्गुणयेत्। कथं। दिक्१०
भूमि१ गिरि७ श्रुति४ गज८ अग्नि३ मुनि७ इषु५ वेद४ षट्६ वह्नि३ एतैः

सं०

॥७॥ कोऽरित्यर्थः ॥ नामाक्षरादित्यपमर्थः । नामस्वरव्यंजनसमुदायात् । अकठवान्
वर्गचतुष्टयप्रमितात् । इ२ उ३ ऋ४ लृ५ ए६ ऐ७ ओ८ औ९ अं१० अः११ एतेऽअ
वर्गाः ॥ क१ ख२ ग३ घ४ ङ५ च६ छ७ ज८ झ९ ञ१० ट११ एते कवर्गाः ॥ ठ१ ड२ ढ३
7 ण४ त५ थ६ द७ ध८ न९ प१० फ११ एते ठवर्गाः ॥ ब१ भ२ म३ य४ र५ ल६ व७
श८ ष९ स१० ह११ एते बवर्गाः ॥ एतद्रूपासमुदायोत्पन्नात् । अकठवादिभिर
द्भिर्मीगेकृते सति उभयोः साध्यसाधकाक्षरवर्गयोः शेषस्याधिक्यरूपस्य
असाधनं च ज्ञात्वा मंत्रं दद्यात् । तथा राशिष्वपि । लग्नतो धनं ज्ञात्वा एवं युग्म
शत्रुकलत्रकाः मरसाधनिकर्मायव्ययात् द्वादशराशयः ॥ एवं गणनायां राम०

॥७॥

स्वराशिमारभ्य मंत्रराशिपर्यंतं शत्रुमरणं व्ययात् ॥ षष्ठाष्टद्वादशाः परित्याज्याः ।
शुभान्यस्वीकार्याः । एवं सुदिनवारनक्षत्रकरणलग्ने शुभे यथा यथा शास्त्रोक्त्या परिशो
ध्य दीक्षा दातव्या ॥ सर्वसंपत्समृद्ध्यर्थं पापापनुत्त्यर्थं च तत्र दीक्षानेकप्रकारा
क्रियामयी वर्णमयी वेधमयी कलामयी इत्यादि । तत्र सर्वसमत्वात् सर्वधार
णत्वात् सुप्रधानत्वाच्च क्रियामयीं संक्षेपतः प्रदर्श्यते जगतो हिताय । शुभानु
कूलसमये आदौ वास्तुपूजामारभेत् ॥ शास्त्रोक्तविधिना यथा ततो रम्ये
तले शुद्धे तु मंडपागारादौ वर्जिते पुण्याहं वाचयित्वा विप्राशिषा सह शास्त्रोदि
तमंडपं विरचय्य तन्मध्ये यथादिक्कावां स्थंडिले वा सर्वतोभद्रात्मकं मंडलं ॥

मं
॥१८॥ अन्यत्र॥ यथाशास्त्रं विरचय्य मंडपस्य चतुर्दिक्षु शास्त्रोक्तलक्षणयुक्तानि कुं
डानि वा कल्पयेत्॥ अथ चोत्तरस्यां दिशि चतुरस्रं सर्वसाधारणं सर्वमतमेकं
कुंडं मंडपान्ते ईशानभागे मेखलात्रययुतं तस्याग्नेय्यां दिशि मेखलोपरि
यथोक्तां योनिं परिकल्पयेत्॥ गुरुः शुक्लाम्बरः प्रत्यङ्मुखो वा दर्भासने निविशेत्॥
समाहितेन्द्रियो मौनी गोमयेनोपलिप्य कुंडमध्ये नाभिस्थाने स्वगृह्योक्त
प्रकारेण वर्तुलं वा चतुष्कोणं वा त्रिकोणं वा चित्ते रेखां स्थापयेत्॥ दक्ष
भागे तु पूर्णाद्युपासितायतनं ततः शुभोदकेन समायुक्तं पूर्णकुंभं ततः सुमनसः
पात्रं परितः घृतप्रज्वलितानां दीपानां शुभानां पुरतः शंखं साधारं परितो वृ राम०
॥१८॥

रं पात्रां शिरस्युत्थाप्य पिपठ्याक्रमेव प्रख्यातं स्थापयित्वा निजवामदक्षिणपार्श्वयोर्गु
रूं गणेशं नत्वा भूतशुद्धिं यथाचरेत् । पद्धोक्तं ॥ प्राणायामं ततः कृत्वा मातृकां तत्र
विन्यसेत् । देहे शीर्षमुखे देवतानि मूलमंत्रस्य विन्यसेत् ॥ षडंगन्यासं ततः कृत्वा
कल्पोक्तविधिना । तत्तन्न्यासान्समारभेत् । तत्र मंडलमध्ये वै धर्मादिपीठपूजा
नंतरमात्मपूजां विधाय हेमरजतताम्रमृन्मयकलशानां मध्ये अन्यतमं यथा
लाभं सम्यक्प्रक्षालितं तंतरं कर्पूरागरुधूपितं शोभनाकृतिं सत्त्वलक्षणां त्रिसू
त्रवेष्टितं । नववस्त्रयुग्मेन नववस्त्रगंधादिभिरभ्यर्चितं नवरत्नोदरदूर्वा
क्षतसमन्वितं । तारमुच्चार्य धारयन् मंत्री कलशिकायामधोनुरवं स्थापयेत्

पश्चाद्ध्यानं कृत्वा पीठस्य कलशस्य चैक्यं संभावयेद्धिया। प्रोक्तकषायोदकैस्सी
र्योदकैर्वीव्यैः मृद्भूतैर्बीजतैः कर्पूरवासितैः। प्रतिलोमेन मातृकां न जपन्नेत
थैव च मूलमंत्रं जपन् पूरयेत्तं कलशं देवताधिया। ततः शंखे कृत्वार्घ्यं चु
षरिते भृङ्गे तोयेन त्वावृत्य गन्धं समात्तोयं स्वावाहयेच्च कलशः सुधीः। इह प्राणा
इत्यादि प्रकारेण च प्राणप्रतिष्ठां च। तद्यथा। ॐ अमृतायै नमः। अमृता
मावाहयामि इत्यमृतामावाह्य जलगन्धादिभिः संपूज्य अमृतायाः। प्राणा
इह प्राणा इत्यादि प्रकारेण प्राणप्रतिष्ठां च कृत्वा॥ ॐ आं मानदायै नमः।
ॐ इं एषायै नमः। ॐ ईं पुष्ट्यै नमः। ॐ उं तुष्ट्यै नमः। ॐ ऊं रत्यै नमः। ॐ ऋं धृत्यै न

क्षं शांतिन्यै नमः। ल्लं चंद्रिकायै नमः। ल्लृं कांत्यै नमः। एं ज्योत्स्नायै नमः। ऐं श्रियै न
मः। ओं प्रीत्यै नमः। औं अंगदायै नमः। अं पूर्णायै नमः। अः पूर्णामृतायै नमः। एता
सां प्रत्येकं पूर्वोक्तप्रकारेण प्राणप्रतिष्ठां पूजां च कृत्वा अनंतरं। ॐ कं मं तपिन्यै
नमः। तपनीमावाहयामीत्यादि वा धूतपन्याः प्राणा इह प्राणा इत्यादि प्रमाणप्रति
ष्ठां च कृत्वा। ॐ खं वं तापन्यै नमः। ॐ गं फं धूम्रायै नमः। ॐ घं पं मरीच्यै नमः। ॐ ङं नं ज्वा
लिन्यै नमः। ॐ चं धं रुच्यै नमः। ॐ छं दं सुषुम्णायै नमः। ॐ जं थं भोगदायै नमः। ॐ झं
तं विश्वायै नमः। ॐ ञं णं बोधिन्यै नमः। ॐ टं ढं धारिण्यै नमः। ॐ ठं डं क्षमायै नमः।
एतासां प्रत्येकं पूर्वोक्तप्रकारेण प्राणप्रतिष्ठां पूजां च कृत्वा। ॐ यं धूम्रार्चिषे नमः

मं०
॥२०॥ ॐ रं कुष्मांडायै नमः। ॐ लं ज्वालिन्यै नमः ॐ वं ज्वालिन्यै नमः। ॐ शं विस्फुलिंगिन्यै नमः
ॐ षं सुश्रियै नमः। ॐ सं सुरूपायै नमः। ॐ हं कपिलायै नमः। ॐ लं हव्यवाहायै नमः
ॐ क्षं हव्यवहायै नमः। इत्यभ्यर्च्य। एतासां एवंविधप्रकारेण प्राणप्रतिष्ठां विधाय च।
अनंतरं। ॐ कं स्वस्थायै नमः। ॐ खं मध्यै नमः। ॐ गं सम्रत्यै नमः। ॐ घं मेधायै नमः॥
10 ॐ ङ कांत्यै नमः। ॐ चं वेलत्यै नमः। ॐ छं दृत्यै नमः। ॐ जं स्थिरायै नमः। ॐ झं स्थि
त्यै नमः। ॐ ञं सिद्ध्यै नमः। ॐ नम इत्यादि अकारादि संपूज्य। प्रत्येकं प्राणप्रतिष्ठां
च कृत्वा। ॐ ह। ॐ सः शुचिषद्वसुरंतरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् नृष
द्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत्। इत्येकान्नपंचपठित्वा राम०
॥२०॥

पूजयामीति संपूज्य प्राणप्रतिष्ठां च कृत्वा। अनंतरं। ॐ टं जरायै नमः। ॐ ठं पालिन्यै
नमः। ॐ डं श्रान्त्यै नमः। ॐ ढं ऐश्वर्यै नमः। ॐ णं रत्यै नमः। ॐ तं कामिकायै नमः। ॐ थं
वरदायै नमः। ॐ दं ह्लादिन्यै नमः। ॐ धं प्रीत्यै नमः। ॐ नं दीर्घायै नमः। इति जलादिभिः
संपूज्य प्रत्येकं प्राणप्रतिष्ठां कृत्वा आसां प्रत्येकं। प्रतद्विष्णुस्तवते वीर्येण मृगो न
भीमः कुचरो गिरिष्ठाः॥ यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा
इति पठित्वा अनेन मावाहयामीत्यावाह्य संपूजयित्वा अस्य च: प्राणा इह प्राणा इ
त्यादिप्रकारेण प्राणप्रतिष्ठां कृत्वा अनंतरं। ॐ पं तीक्ष्णायै नमः। ॐ फं रौद्रायै नमः।
ॐ बं भयायै नमः। ॐ भं निद्रायै नमः। ॐ मं तन्द्रायै नमः। ॐ मं तन्द्रायै नमः। ॐ दुस्यै

मे०
॥२२॥

नमः॥ ॐ हं क्रोधिन्यै नमः। ॐ त्लं त्रिकपायै नमः। ॐ वं उल्कायै नमः। ॐ शं मत्स्यै नमः
इत्यादिप्रकारेणानन्तादिभिः संपूज्य प्रत्येकं त्र्यंबकमिति ऋचं पठित्वा। त्र्यंबकय
जामहे सुगंधिं पुष्टिवर्द्धनं। उर्वारुकमिव बंधनान्मृत्योर्मुक्षीय मामृतात्॥ त्र्यं
बकं यजामहे सुगंधिं पतिवेदनं। उर्वारुकमिव बंधनादितो मुक्षीय मामुतः॥ इति
पठित्वा त्र्यंबकमावाहयामीत्यावाहय ऋचं पूजयामीति पूजयित्वा त्र्यंबकं प्राणा इ
ह प्राणा इहेत्यादिप्रकारेण प्राणप्रतिष्ठां च कृत्वा। अनन्तरं ॐ हं पीतायै नमः। ॐ
सं श्वेतायै नमः। ॐ हं अरुणायै नमः। ॐ लं असितायै नमः। ॐ सं अनन्तायै नमः।
नम इत्यादिप्रकारेण प्रत्येकं मात्रादि संपूज्य प्राणप्रतिष्ठां च कृत्वा। आसीन

राम०
॥२१॥